ॐ

दिव्यानन्दाय नमः

स्तोत्ररत्नावली

प्रकाशक

श्रोत्रिय ब्रम्हनिष्ठ

श्री १०८ स्वामी रसानन्द पुरीजी महाराज

संस्थापक व अध्यक्ष, स्वामी दिव्यानन्द आश्रम

मोठा परिसर, दिव्यनगर, मानवत ता. मानवत, जि. परभणी ४३१५०५

ब्रह्मलिन सद्गुरुवर्य १०८

स्वामी श्री दिव्यानंन्द पुरीजी महाराज

मोडोनि माया कुंजरु । मुक्तमोतियेचा वोगरु ।।
जेववितां सद्गुरु । निवृत्ती वंदू ।।

ॐ दिव्यानन्दाय नमः

विद्ययाऽमृतमश्नुते

दिव्यानन्द आश्रम मानवत

स्तोत्ररत्नावली

श्रोत्रिय ब्रह्मनिष्ठ १०८

स्वामी श्री रसानन्दपुरीजी महाराज

संपादकिय....

आपण ज्या मानवयोनिला आलो आहोत. तो मानव देह आपल्याला एका विशिष्ट ध्येयाच्या प्राप्तीसाठी प्राप्त झालेला आहे. अर्थात भगवंतानी दिलेला आहे. आणि ते ध्येय आहे सच्चिदानंद स्वरुप परमात्म्याची प्राप्ती म्हणजेच आपल्याच स्वस्वरुपाची प्राप्ती. ज्या पदावरून आपले पतन झाले आहे. ते पद प्राप्त करून घेतले तरच मानव देहाची सार्थकता आहे. अन्यथा त्या जीवाचा विनाशच आहे. श्रुती सांगते....

"इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महतीविनष्टि"

त्या ध्येयाच्या प्राप्तिसाठी शास्त्राने प्रामुख्याने कर्म, उपासना, व ज्ञान हे तीन मार्ग सांगितले आहेत. त्यापैकी सर्वसामान्य मानवाला झेपणारा मार्ग म्हणजे "उपासना" मार्ग होय. ज्याला स्थूलरूपानें भक्ति मार्गही म्हणतात. त्या उपासनेचे अनेक प्रकार आहेत. त्यापैकी एक म्हणजे आपल्या इष्ट देवतेची स्तूति करणे होय.

अनेक साधू-संतांनी अनेक देवतांची स्तूति गायिली आहे.

आपणास इष्टदेवतेची स्तूति करता यावी म्हणून परमादरणीय परम पूज्य गुरुवर्य १०८ स्वामी रसानन्द पुरीजी महाराज यांच्या मार्गदर्शनानुसार काही विशिष्ट स्तोत्र संग्रह रूपाने "स्तोत्र रत्नावली" या ग्रंथामध्ये मुद्रित केली आहेत. त्या स्तूतिचा सदोपयोग करून आपण स्वत:चे कल्याण करून घ्यावे.

संपादक

ब्र. ज्ञान चैतन्य

-: अनुक्रमणिका :-

१.	महाराज परिचय	१
२.	गणपतिस्मरणम्	७
३.	प्रातःस्मरणम्	७
४.	गुरुपूजेचे मंन्त्र	८
५.	अथ स्वस्तिवाचनम्	९
६.	स्वाध्यायाच्या अगोदर करावयाचे मंगलाचरण	१०
७.	वैदिक-शान्तिपाठः	११
८.	कौपीन-पञ्चकम्	१३
९.	विठ्ठलस्मरणम्	१४
१०.	श्रीपांडुरंगाष्टकम्	१६
११.	अथ श्रीविष्णुसहस्रनामस्तोत्रम्	१७
१२.	श्रीशिवपञ्चाक्षरस्तोत्रम्	३०
१३.	बिल्वाष्टकम्	३१
१४.	रुद्राष्टकम्	३२
१५.	शिवमानसपूजा	३३
१६.	शिवताण्डवस्तोत्रम्	३४
१७.	श्रीदक्षिणामूर्तिस्तोत्रम्	३७

१८. अथ श्रीशिवमहिम्नः स्तोत्रम् ३९
१९. महामृत्युञ्जयमन्त्र ४७
२०. चर्पटपञ्जरिकास्तोत्रम् ४८
२१. आत्मषट्कम् ५०
२२. परापूजा ५१
२३. दशश्लोकी ५२
२४. श्रीसरस्वत्यष्टकम् ५३
२५. महिषासुरमर्दिनी स्तोत्रम् ५४
२६. श्री ज्ञानेश्वर महाराजकृत हरिपाठ ५८
२७. श्री गुरुपरंपरेचे अभंग ६४
२८. स्वामी दिव्यानन्द महाराजांची आरती ६६
२९. पसायदान ६७

ॐ दिव्यानन्दाय नमः

'स्वामी दिव्यानन्द पुरीजी महाराज', 'स्वामी रसानन्द पुरीजी महाराज' व 'स्वामी दिव्यानन्द आश्रम' चा थोडक्यात परिचय

वेदान्त केशरी रंगनाथ महाराज परभणीकर "गुरुजी" तथा ह.भ.प. संभादादा महाराज इत्यादी थोर संतांच्या पाद पद्म् परागाने पूणीत झालेल्या श्रीक्षेत्र मानवत येथे 'स्वामी दिव्यानन्द महाराज यांचा जन्म झाला.

प्राथमिक शाळेत असतांना स्वामीजींनी शाळा सोडून, अध्यात्माची ओढ म्हणून श्री रंगनाथ महाराज परभणीकर – गुरुजीकडे इ.स. १९५० ते इ.स. १९५७ या कालावधीत त्यांची सेवा करून, वेदान्त श्रवण करण्याकरिता व सत्संगाकरीता मधुकरी मागून परभणीत राहु लागले.

पुढे चालून हिमालयाच्या पायथ्यासी – ऋषिकेश या तीर्थक्षेत्रात राहून, शास्त्रांचे अध्यायन करू लागले. व संत–महात्म्याची सेवा करून सत्संग करु लागले.

काही वर्षांनी 'ऋषिकेश' येथून ते 'वाराणसी' (काशी) येथे गेले. तेथे आश्रमात राहून, महात्म्याची सेवा करून संस्कृत व शास्त्रांचे अध्ययन करु लागले. अध्ययन झाल्यानंतर परत ऋषिकेशला येवुन "श्री विठ्ठल आश्रम" स्थापन केला व तेथे राहु लागले.

इ.स. १९७० ला मानवत (जि. परभणी) येथे सहज आले व पंधरा दिवसांनी परत ऋषिकेशच्या आश्रमात जाण्याकरीता निघाले. मानवतच्या नागरिकांनी नेहमीसाठीच मानवतला सत्संगासाठी राहण्याची विनंती केली. ती विनंती स्वामीजींनी मान्य केली नाही. स्वामीजी ऋषिकेशला जाण्याकरीता

मानवतरोडला गेले. मानवतच्या नागरिकांनी तेथेही स्वामीजींना मानवतला राहण्याविषयी आग्रह केला व रडले. नागरिकांची ही अवस्था पाहुन मानवतला आश्रम स्थापन करून सत्संगाकरीता राहण्याचा होकार दिला. स्वामीजीसहित नागरिक मानवतला श्रीविठ्ठल मंदिरात आले. सत्संग होऊ लागला.

एके दिवशी १९७० ला चातुर्मासात आश्विन महिन्यात 'श्री लक्ष्मणराव डमढरे' यांच्या घरी स्वामीजी जेवण्याकरीता आले असता पूर्वाश्रमी कु. रत्नप्रभाताईंनी प्रथमच स्वामीजींचे दर्शन घेतले. दर्शन घेतल्यानंतर स्वामीजींनी विचारले.–''भगवद्गीतेची संथा घेण्याकरिता श्री विठ्ठल मंदिरात येते का? कु. रत्नप्रभा यांनी होकार दिला व दुसऱ्या दिवसीपासून श्री विठ्ठल मंदिरात भगवद्गीतेची संथा घेण्याकरिता जाऊ लागल्या. त्यावेळेस कु. रत्नप्रभा या इयत्ता सातवीच्या वर्गात शिक्षण घेत होत्या.

इयत्ता आठवीपासून इ.स. १९७१ पासून सत्संग सुरु केला. इ.स. १९७३ मॅट्रीक झाल्या. मॅट्रीक झाल्यानंतर पुढे उच्च शिक्षण घेऊन डॉक्टर होऊन गरीब–जनतेची मोफत सेवा करावी हे ध्येय मनाशी होते पण सत्संगाच्या प्रभावामुळे हे मनातील ध्येय ढासळले व यापुढे जीवनाचा मार्ग प्रवाह अन्य म्हणजे स्वामीजीसारखे ''परमार्थ'' करत त्यांच्या संगतीत राहून ''ज्ञान–दान'' करावे असा निश्चय केला. मॅट्रीकनंतरचे शिक्षण न घेता सत्संग करू लागल्या. स्वामीजीबरोबर भारतातल्या अनेक तीर्थयात्रा करु लागल्या.

मानवतला स्वामीजींचा जो आश्रम ''भारतीय स्वाध्याय केंद्र'' येथे स्वामीजींच्या सानिध्यात राहून अनुष्ठाने करुन जीवन व्यतीत करु लागल्या. श्रीविठ्ठल मंदिर, नवेदत्त मंदिर, अमरेश्वर मंदिर येथेही अनुष्ठान करु लागल्या.

कांही चातुर्मासांत दिवसातून एकदा एक मुठ तांदुळ शिजवुन हा अल्पाहार घेऊन जीवन व्यतीत करु लागल्या. कांही चातुर्मासात एक वेळ जेवण करून साधना करु लागल्या. तर कांही चातुर्मासात फक्त दूध पिऊन साधना केल्या.

''आळंदी – पंढरपूरच्या अनेक पायी यात्रा'' पायात वाहन न घालता केल्या.

स्वामी रसानंद पुरींना आशा प्रकारे स्वामी दिव्यानंद पुरीजी महाराज यांचा इ.स. १९७१ ते इ.स. १९९२ पर्यन्त सेवा, मार्गदर्शन व सत्संग असा एकूण सतत एकविस (२१) वर्षे सहवास घडला.

स्वामी दिव्यानन्द पुरी यांनी स्वामी रसानन्द पुरी यांना इ.स. १९८३ पासून वेदान्त ग्रंथाचे पाठ–चिंतन करण्यास व कीर्तन व प्रवचन करण्यास ''शुभारंभ'' करून दिला. ते कार्य आजही चालू आहे.

माघ शु. पंचमी शके १९१३ दिनांक ९–२–१९९२ रविवारला रात्री ''स्वामी दिव्यानन्द पुरी महाराज'' ब्रह्मलीन झाले. ही स्वामी रसानन्द पुरी. यांच्या जीवनातील महान दुःखद घटना घडली. या दुःखातून स्वतःस सावरणे त्यांना कठीण जाऊ लागले.

असेच दिवस निघून गेले. पुढे स्वामी दिव्यानन्द पुरीजी महाराज यांची पहिली पुण्यतिथी माघ शु. ५ शके १९१४ दि. २८ जानेवारी १९९३ ला श्री. ह.भ.प. नामदेव महाराज धनेगांवकर यांच्या शुभहस्ते शुभारंभ करून अखंड हरिनाम सप्ताह संपन्न करण्यात आला. आजही पुण्यतिथीनिमित्त अखंड हरिनाम सप्ताह संपन्न करण्यात येत असतो.

पुढे चालून आळंदी कार्तिक वद्य १३ शके १९१५ ला (इ.स. १९९३) कार्तिक एकादशी निमित्ताने आळंदी वारीस श्री. ह.भ.प. नामदेव

महाराज धनेगांवकर, स्वामी रसानन्द पुरीजी महाराज, रावसाहेब निर्मळ (काका), श्री लक्ष्मणराव डमढरे गेले. आळंदी येथे श्री. ह.भ.प. नामदेव महाराज धनेगांवकर यांच्या प्रेरणेने ''मानवत येथे स्वामीजींचे आध्यात्मिक कार्य पुढे चालवण्याकरीता आश्रम स्थापन करावा'' असा विचार मांडण्यात आला. स्वामी रसानन्द पुरीजी महाराजांनी आपली एकटीने आश्रम चालविण्यात असमर्थता प्रकट केली. तेव्हा श्री.ह.भ.प. नामदेव महाराज म्हणाले – ''हे स्वामीजींचे आध्यात्मिक कार्य चालवण्याकरीता आपण जर एकट्या असमर्थ असाल तर रावसाहेब निर्मळ (काका) यांना हे कार्य करण्यास सांगतो. ते मी दिलेला शब्द पाळतील याची मला पूर्ण खात्री आहे.'' असे म्हटल्यानंतर स्वामी रसानंद पुरी, रावसाहेब निर्मळ (काका) व श्री लक्ष्मणराव डमढरे यांनी होकार दिला. हा दिवस म्हणजे कार्तिक व. १३ शके १९१४ इ.स. १९९३ ला ''स्वामी दिव्यानन्द आश्रम'' या नांवाने मोंढा परिसर, दिव्यनगर मानवत येथे संस्था स्थापन करू असे निश्चित झाले.

असतो मा सद्गमय ।
तमसो मा ज्योतिर्गमय ।
मृत्योर्माऽमृतं गमय ।।

या वेदमंत्राच्या अर्थानुसार मानव जीवन कल्याणकरीता ''स्वामी दिव्यानन्द आश्रम'' स्थापन करण्यात आला. ज्याचे परमध्येय–उद्देश्य–सर्व मानवासाठी असत्याकडून सत्याकडे नेण्याकरीता मृत्युकडून अमरत्वाकडे नेण्याकरीता, अज्ञानाकडून ज्ञानाकडे घेऊन जाणे हे आहे. या उद्देशान्तर्गत बाल संस्कार, युवा संस्कार, वृद्ध संस्कारादि देणे हे या आश्रमाचे उद्देश आहेत.

तसेच विद्यार्थ्यांना शालेय व व्यवसायिक शिक्षणाची संधी उपलब्ध करून देण्याकरीता हा आश्रम स्थापन करण्यात आला आहे.

सत्य संकल्पाचा दाता नारायण ।
पूर्ण करी सर्व मनोरथ ।।

श्री संत तुकोबाराय यांच्या या वचनानुसार हा सत्य संकल्प चैत्र शु. प्रतिपदा शके १९१४ इ.स. ११९४ ला गुढी पाडव्याच्या शुभमुहुर्तावर श्री.ह.भ.प. नामदेव महाराज धनेगांवकर यांच्या शुभहस्ते, अनेक संत महात्म्यांच्या व भक्तवृंदांच्या उपस्थितीत ''स्वामी दिव्यानन्द आश्रम'' या संस्थेचा शुभारंभ करण्यात आला. सुरवातीला पर्णकुटी बांधून साधक, विद्यार्थी राहू लागले.

श्री.ह.भ.प.रावसाहेब महाराज निर्मळ (काका) यांच्या कुशल मार्गदर्शनाने, अखंडित परिश्रमाने व वेदान्त पुराण पाठ सांगण्याच्या योग्य पद्धतीमुळे – ''अधिकार तैसा करू उपदेश'' या जगद्गुरु तुकोबाराय यांच्या उपदेशानुसार बीजारोपण करुन, त्याचे वृक्षात रुपान्तर करून त्यास फळेही लागली – लागत आहेत. आजुन हि त्याच पद्धतीने कार्य चालू आहे.

स्वामी रसानन्द पुरीजी महाराज हे स्वामी दिव्यानन्द महाराजांचे ज्या ज्या ठिकाणी कीर्तन व प्रवचन होत असत, त्या त्या ठिकाणी व अन्य ठिकाणी प्रवचन – कीर्तन करु लागले. तसेच श्रीमद्भागवत सप्ताह, श्रीमद्देवीभागवत सप्ताह, श्री तुळशीरामायण सप्ताह, भावार्थ रामायण सप्ताह, शिव पुराण अखंड हरिनाम सप्ताहाचे आयोजन करून सुसंस्कार, धर्म प्रसार व जागृतीची कार्य करू लागले.

इवलेसे रोप लावियेले द्वारी ।
त्याचा वेलू गेला गगनावरी ।।

अनेक साधकांनी, विद्यार्थ्यांनी शालेय शिक्षण घेतल्यानंतर आश्रमात राहून, साधना करुन, वेदान्ताचे – आध्यात्म ज्ञान संपादन करून जीवनाचे साध्य प्राप्त करून घेत आहेत.

आश्रमातील कांही साधकांनी हिमालयाच्या पायथ्यासी जाऊन – हरिद्वार ऋषिकेश तसेच वाराणसीस जाऊन, तेथील आश्रमात राहून, महात्म्याची सेवा करून सत्संग केला– करत आहेत. त्यातील कांही साधकांना आश्रम देऊन ते याच आश्रमाचे ध्येय पुढे नेत आहेत. ज्ञान–दान करीत आहेत. तर कांही साधक आळंदी पंढरपूर येथे राहून अध्यात्म–ज्ञान–दान करून महाराष्ट्रात कीर्तन, प्रवचन, अखंड हरिनाम सप्ताहाचे आयोजन करून वारकरी सांप्रदायाचे प्रचार कार्य करत आहेत.

स्वामी रसानन्दपुरी महाराज यांनी इ.स. २००६ ला कैलास – मान सरोवर यात्रा भारत सरकारच्या मार्गदर्शनानुसार पायी–पायी केली.

अशा रितीने आजही अखंड परिश्रमाने, मार्ग दर्शनाचे ''स्वामी दिव्यानन्द आश्रम'' या संस्थेचे उद्देश्य–ध्येय कार्य चालू आहे.

ही संस्था साखरे सांप्रदायातील आहे. यामध्ये श्री अच्युत महाराज केसकर, श्रीरामचंद्र जोशी महाराज – साखरे महाराज, विनायक महाराज साखरे, श्री रंगनाथ महाराज परभणीकर गुरुजी, स्वामी दिव्यानन्द पुरीजी महाराज मानवत, स्वामी रसानन्द, पुरीजी महाराज मानवत अशा थोर विभुती होऊन गेल्या व काही आजही आहेत.

***

* गणपतिस्मरणम् *

गलद्दानगण्डं मिलद्भृङ्गखण्डं
चलच्चारुशुण्डं जगत्त्राणशौण्डम् ।
लसद्दन्तकाण्डं विपद्भङ्गचण्डं
शिवप्रेमपिण्डं भजे वक्रतुण्डम् ।।

***

* प्रातःस्मरणम् *

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तमवैति नित्यं
तद् ब्रह्म निष्कलमहं न च भूतसङ्घः ।।१।।
प्रातर्भजामि मनसां वचसामगम्यं
वाचो वीभान्ति निखिला यदनुग्रहेण ।
यन्नेति नेति वचनैर्निगमा अवोचु-
स्तं देवदेवमजमच्युतमाहुरग्र्यम् ।।२।।
प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ।।३।।
श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातःकाले पठेद्यस्तु स गच्छेत् परमं पदम् ।।४।।

***

* गुरुपूजेचे मंन्त्र *

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ।।
नमः कमल-नाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ।।
वासनाद्वासुदेवस्य वासितं भुवनत्रयं ।
सर्वभूतनिवासोऽसि वासुदेव नमोस्तु ते ।।
शंकरं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ।।
ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ।।
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितम् येन तस्मै श्रीगुरवे नमः ।।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुदेवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ।।
आकाशात् पतितं तोयं यथा गच्छति सागरम् ।।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ।।

***

* अथ स्वस्तिवाचनम् *

हरिः ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। पृषदश्वा मरुतः पृश्निमातरः शुभं यात्रानो विदथेषुजग्मयः ।। अग्निर्जिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ।। भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमा-क्षभिर्यजत्राः ।। स्थिरैरङ्गैस्तुष्टुवां सस्तनुभिर्व्यशेमहि देवहितं यदायुः ।। ॐ शतमिन्नु शरदो अन्तिदेवायत्रानश्चक्रा जरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः ।। अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।। व्विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ।। द्यौः शांतिरन्तरिक्षं शांतिः पृथिवी शांतिरापः शांतिरोषधयः शांतिः ।। व्वनस्पतयः शांतिर्व्विश्वेदेवाः । शांतिर्ब्रह्म शांतिः सर्व्वं शांतिः शांतिरेव शांतिःसा मा शांतिरेधि ।। ॐयतोयतः समीहसे ततो नोऽअभयङ् कुरु । शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यं ।। सुशांतिर्भवतु ।।

***

* स्वाध्यायाच्या अगोदर करावयाचे मंगलाचरण *

हरिः ॐ सहनाववतु सहनौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ।
ॐ शान्तिः! शान्तिः!! शान्तिः!!!

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरुषाय तुभ्यम् ।।

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।।
विनायकं गुरुं नौमि साखरेनाम विश्रुतम्
येषां चरणसान्निध्यात् जीवा मुक्ता भवन्ति हि ।
साखरेवंशविख्यातं ज्ञानदानपरायणं
विनायकं गुरुं वन्दे भवबन्धविमुक्तये ।।

श्रीरंगनाथं गुरुराजवर्यं मुमुक्षूणां ज्ञानदानैकदक्षम् ।
प्रभावतिक्षेत्रनिवासिनं तं नमामि वेदान्तविदां वरिष्ठम् ।।

***

* वैदिक-शान्तिपाठः *

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्तिः! शान्तिः!! शान्तिः!!! ।।१।।

ॐ सह नावावतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः! शान्तिः!! शान्तिः!!! ।।२।।

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव ।

स मेन्द्रो मेधया स्पृणोतु । अमृतस्यदेव ! धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधयापिहितः । श्रुतं मे गोपाय ।। ॐ शान्तिः शान्तिः शान्तिः ।।३।।

ॐ अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणं सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशंकोर्वेदानुवचनम् ।। ॐ शान्तिः शान्तिः शान्तिः ।।४।।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ शान्तिः शान्तिः शान्तिः ।।५।।

ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मोपनिषदं, माहं ब्रह्म निराकुर्या, मा मा ब्रह्म निराकरो-दनिराकरणमस्त्वनिराकरणं मे अस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ।। ॐ शान्तिः शान्तिः शान्तिः ।।६।।

ॐ वाङ्मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारमवतु वक्तारम् ।। ॐ शान्तिः शान्तिः शान्तिः ।।७।।

ॐ भद्रं नो अपिवातय मनः ।। ॐ शान्तिः शान्तिः शान्तिः ।।८।।

ॐ भद्रं कर्णेभिः श्रुणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।। ॐ शान्तिः शान्तिः शान्तिः ।।९।।

ॐ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।। ॐ शान्तिः शान्तिः शान्तिः ।।१०।।

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो महद्भ्यो नमो गुरुभ्यः । सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ।

ॐ नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ।।
श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।।
तं त्रोटकं वार्तितकारमन्यान्नस्मद्गुरुन्संततमानतोऽस्मि ।।

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशमरम् ।।
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ।।
ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ।।
यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याता सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम्
ॐ शान्तिः शान्तिः शान्तिः ।।
ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोःपदम् ।
मंत्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोःकृपा ।।

***

* कौपीन-पञ्चकम् *

वेदान्तवाक्येषु सदा रमन्तो भिक्षान्नमात्रेण च तुष्टिमन्तः ।
विशोकमन्तःकरणे रमन्तः कौपीनवन्तः खलु भाग्यवन्त ।।१।।
मूलं तरोः केवलमाश्रयन्तः पाणिद्वयं भोक्तुममंत्रयन्तः ।
कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः ।।२।।
देहादिभावं परिवर्तयन्तः आत्मानमात्मन्यवलोकयन्तः ।
नान्तं न मध्यं न बहिः स्मरन्तः कौपीनवन्तः खलु भाग्यवन्तः ।।३।।
स्वानन्दभावे परितुष्टिमन्तः संशान्तसर्वेन्द्रियतुष्टिमन्तः ।
अहर्निशं ब्रह्मणि ये रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ।।४।।
पञ्चाक्षरं पावनमुच्चरन्तः पतिं पशूनां हृदि भावयन्तः ।
भिक्षाशिनो दिक्षु परिभ्रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ।।५।।

***

* विठ्ठलस्मरणम् *

घननील-सुकोमल-कान्ततनुं
कटिशोभितदक्षिणवामकरम् ।
भुवि-राजितसुंदरपादमजं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।१।।

अरुणोदयकान्तिनिभे वदने
स्वधरे मधुरे ललितं कलितम् ।
मृदुहास्यमिदं सुखदं विमलं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।२।।

शरदम्बरमण्डितचन्द्रनिभं
मुनिमानसमानसमोदविधम् ।
निजलोकहिताय चलन्नयनं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।३।।

मकराकृतिकुण्डलजा सुषमा
सुविभाति कपोलतले प्रतिमा ।
हृदये विमले विधिना वरणं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।४।।

त्वयि शस्त्रबलं न च शास्त्रबलं
न वित्तबलं न च धर्म बलम् ।
यदि काङ्क्षसि संसृतितस्तरणं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।५।।

जननीं जनकं त्यज रे ललनां
तनयं तनयां तनुसुन्दरताम् ।
व्यसनेषु न कोपि सहायकरं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।६।।
मनसा मनने वचसा वचने
जननं न पुनर्जननीजठरे ।
न हि जन्म कुतो मरणं शरणं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।७।।
शुकसारसकोकिलकेकिगणैः
रतिशोभितममितगाङ्ग - कणैः ।
गिरिराजनिकुंजमकारि गृहं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।८।।
ऋषयो मुनयः प्रथमाश्रमिणो
विचरन्ति मुदा सुविचार्य हृदा ।
ऋषिकेशमवाप्य ददात्यभयं
कुरु विठ्ठल विठ्ठल रे स्मरणम् ।।९।।

इति श्रीदिव्यानन्दविरचितं विठ्ठलस्तोत्रं संपूर्णम्

ॐ शांतिः । शांतिः शांतिः ।।

***

* श्रीपांडुरंगाष्टकम् *

महायोगपीठे तटे भीमरथ्या वरं पुंडरीकाय दातुं मुनींद्रैः ।
समागत्य तिष्ठन्तमानंदकंदं परब्रह्मलिंगं भजे पांडुरंगम् ।।१।।

तडिद्वाससं नीलमेघावभासं रमामंदिरं सुंदरं चित्प्रकाशम् ।
वरं त्विष्टिकायां समन्यस्तपादं परब्रह्मलिंगं भजे पांडुरंगम् ।।२।।

प्रमाणं भवाब्धेरिदं मामकानां नितंबः कराभ्यां धृतो येन तस्मात् ।
विधातुर्वसत्यै धृतो नाभिकोशः परब्रह्मलिंगं भजे पांडुरंगम् ।।३।।

स्फुरत्कौस्तुभालंकृतं कंठदेशे श्रिया जुष्टकेयूरकं श्रीनिवासम् ।
शिव शान्तमीड्यं वरं लोकपालं परब्रह्मलिंगं भजे पांडुरंगम् ।।४।।

शरच्चंद्रबिंबाननं चारुहासं लसत्कुण्डलाक्रान्तगंडस्थलाङ्गम् ।
जपारागबिंबाधरं कंजनेत्रं परब्रह्मलिंगं भजे पांडुरंगम् ।।५।।

किरीटोज्ज्वलत्सर्वदिक्प्रान्तभागं सुरैरर्चितं दिव्यरत्नैरनर्घ्यैः ।
त्रिभंगाकृतिं बर्हमाल्यावतंसं परब्रह्मलिंगं भजे पांडुरंगम् ।।६।।

विभुं वेणुनादं चरन्तं दुरन्तं स्वयं लीलया गोपवेषं दधानम् ।
गवां वृंदकानन्दनं चारुहासं परब्रह्मलिंगं भजे पांडुरंगम् ।।७।।

अजं रुक्मिणीप्राणसंजीवनं तं परं धाम कैवल्यमेकं तुरीयम् ।
प्रसन्नं प्रपन्नार्तिहं देवदेवं परब्रह्मलिंगं भजे पांडुरंगम् ।।८।।

स्तवं पांडुरंगस्य वै पुण्यदं ये
पठन्त्येकचित्तेन भक्त्या च नित्यम् ।
भवांभोनिधिं तेऽपि तीर्त्वाऽन्तकाले
हरेरालयं शाश्वतं प्राप्नुवन्ति ।।९।।

इति श्री शङ्कराचार्य विरचितं श्रीपांडुरंगाष्टकं समाप्तम्

***

ॐ

श्रीपरमात्मने नमः

* अथ श्रीविष्णुसहस्रनामस्तोत्रम् *

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ।।
नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ।।

वैशम्पायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ।।१।।

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः पाप्नुयुर्मानवाः शुभम् ।।२।।
को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ।।३।।

भीष्म उवाच

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ।।४।।
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ।।५।।
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ।।६।।

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ।।७।।
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ।।८।।
परमं यो महत्तेजः परम यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ।।९।।
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययःपिता ।।१०।।
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ।।११।।
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे श्रृणु पापभयापहम् ।।१२।।
यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ।।१३।।
ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ।।१४।।
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोक्षर एव च ।।१५।।
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ।।१६।।
सर्वः शर्व शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ।।१७।।
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ।।१८।।

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ।।१९।।
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ।।२०।।
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ।।२१।।
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ।।२२।।
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ।।२३।।
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ।।२४।।
वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ।।२५।।
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ।।२६।।
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ।।२७।।
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ।।२८।।
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ।।२९।।
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ।।३०।।

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ।।३१।।
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ।।३२।।
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविंदां पतिः ।।३३।।
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ।।३४।।
अमृत्युःसर्वदृक् सिंहःसन्धाता सन्धिमान्स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ।।३५।।
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ।।३६।।
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षःसहस्रपात् ।।३७।।
आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ।।३८।।
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ।।३९।।
असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धिसंकल्पः सिद्धिदः सिद्धिसाधनः ।।४०।।
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ।।४१।।
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ।।४२।।

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ।।४३।।
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ।।४४।।
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ।।४५।।
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ।।४६।।
इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ।।४७।।
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ।।४८।।
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ।।४९।।
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मीपद्मनिभेक्षणः ।।५०।।
पद्मनाभोऽरविन्दाक्षः पद्मगर्भ शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ।।५१।।
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ।।५२।।
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ।।५३।।
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं करणं कर्ता विकर्ता गहनो गुहः ।।५४।।

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ।।५५।।
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ।।५६।।
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ।।५७।।
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ।।५८।।
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ।।५९।।
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ।।६०।।
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ।।६१।।
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ।।६२।।
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सो रत्नगर्भो धनेश्वरः ।।६३।।
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ।।६४।।
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ।।६५।।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ।।६६।।

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्ह सात्वतां पतिः ।।६७।।
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ।।६८।।
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ।।६९।।
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाश्रृङ्गः कृतान्तकृत् ।।७०।।
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ।।७१।।
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः समर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ।।७२।।
भगवान् भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ।।७३।।
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ।।७४।।
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ।।७५।।
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ।।७६।।
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ।।७७।।
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ।।७८।।

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ।।७९।।
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ।।८०।।
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ।।८१।।
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ।।८२।।
कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ।।८३।।
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।।८४।।
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ।।८५।।
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ।।८६।।
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ।।८७।।
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ।।८८।।
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ।।८९।।

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ।।९०।।
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ।।९१।।
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ।।९२।।
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ।।९३।।
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकश्रृङ्गो गदाग्रजः ।।९४।।
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ।।९५।।
समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ।।९६।।
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ।।९७।।
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः श्रृङ्गी जयन्तः सर्वविज्जयी ।।९८।।
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ।।९९।।
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ।।१००।।

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ।।१०१।।
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ।।१०२।।
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ।।१०३।।
भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ।।१०४।।
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ।।१०५।।
सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ।।१०६।।
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ।।१०७।।
अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ।।१०८।।
सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ।।१०९।।
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ।।११०।।
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ।।१११।।

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ।।११२।।
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ।।११३।।
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ।।११४।।
आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ।।११५।।
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ।।११६।।
भूर्भुवः स्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ।।११७।।
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ।।११८।।
आत्मयोनिः स्वयंजातो वैखानः सामागायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ।।११९।।
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ।।१२०।।

।। सर्वप्रहरणायुध ॐ नम इति ।।

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेणप्रकीर्तितम् ।।१२१।।
य इदं श्रृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ।।१२२।।

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धन-समृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ।।१२३।।
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ।।१२४।।
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ।।१२५।।
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ।।१२६।।
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ।।१२७।।
रोगार्तो मुच्यते रोगाद्बद्धोमुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ।।१२८।।
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ।।१२९।।
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ।।१३०।।
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ।।१३१।।
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ।।१३२।।
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ।।१३३।।

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ।।१३४।।
ससुरासुरगन्धर्व सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ।।१३५।।
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्र क्षेत्रज्ञ एव च ।।१३६।।
सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ।।१३७।।
ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ।।१३८।।
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्व जनार्दनात् ।।१३९।।
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ।।१४०।।
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ।।१४१।।
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ।।१४२।।

ॐ तत्सदिति श्रीमहाभारते शतसाहस्रयां संहितायां
वैयासिक्यामानुशासनिके पर्वणि भीष्मयुधिष्ठिरसंवादे
श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रम् ।।

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

***

* श्रीशिवपञ्चाक्षरस्तोत्रम् *

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै 'न'काराय नमः शिवाय ।।१।।

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय
तस्मै 'म'काराय नमः शिवाय ।।२।।

शिवाय गौरीवदनाब्जवृन्द –
सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै 'शि'काराय नमः शिवाय ।।३।।

वसिष्ठकुम्भोद्भवगौतमार्य –
मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय
तस्मै 'व'काराय नमः शिवाय ।।४।।

यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै 'य'काराय नमः शिवाय ।।५।।

पञ्चाक्षरमिदं पुण्यं 'य'पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।।६।।

इति श्रीशङ्कराचार्यविरचितं पञ्चाक्षरस्तोत्रं सम्पूर्णम्

* * *

* बिल्वाष्टकम् *

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुतम् ।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ।।१।।

त्रिशाखैर्बिल्पत्रैश्च अच्छिद्रैः कौमलैस्तथा ।
शिवपूजां करिष्यामि एकबिल्वं शिवार्पणम् ।।२।।

अखण्डबिल्वपत्रेण पूजितं नन्दिकेश्वरम् ।
शुध्यते सर्वपापेभ्य एकबिल्वं शिवार्पणम् ।।३।।

शालिग्रामशिलामेकां विप्राणां जात्वर्पयेत् ।
सोमयज्ञमहादानमेकबिल्वं शिवार्पणम् ।।४।।

दन्तिकोटिसहस्राणि अश्वमेधशतानि च ।
कोटिकन्यामहादानमेकबिल्वं शिवार्पणम् ।।५।।

लक्ष्म्याश्च स्तन उत्पन्नं महादेव-सदाप्रियम् ।
बिल्ववृक्षं प्रयच्छामि एकबिल्वं शिवार्पणम् ।।६।।

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।
अघोरपापसंहारमेकबिल्वं शिवार्पणम् ।।७।।

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय एकबिल्वं शिवार्पणम् ।।८।।

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
सर्वपाप विनिर्मुक्तः शिवलोकमवाप्नुयात् ।।९।।

इति श्रीबिल्वाष्टकं सम्पूर्णम्

***

* रुद्राष्टकम् *

नमामीशमीशान निर्वाणरूपम् । विभुं व्यापकं ब्रह्म वेदस्वरूपम् ।।
अजं निर्गुणं निर्विकल्पं निरीहम् । चिदाकाशमाकाशवासं भजेऽहम् ।।१।।

निराकारमोंकारमूलं तुरीयम् । गिराज्ञानगोतीतमीशं गिरीशम् ।।
करालं महाकालकालं कृपालम् । गुणागारसंसारपारं नतोऽहम् ।।२।।

तुषाराद्रिसंकाशगौरं गभीरम् । मनोभूतकोटिप्रभाश्रीशरीरम् ।।
स्फुरन्मौलिकल्लोलिनी चारुगङ्गा । लसद्भालबालेन्दुकण्ठे भुजङ्गा ।।३।।

चलत्कुण्डलं भ्रूसुनेत्रं विशालम् । प्रसन्नाननं नीलकण्ठं दयालम् ।।
मृगाधीशचर्माम्बरं मुण्डमालम् । प्रियं शमरं सर्वनाथं भजामि ।।४।।

प्रचण्डं प्रकृष्टं प्रगल्भं परेशम् । अखण्डं अजं भानुकोटिप्रकाशम् ।।
त्रयःशूलनिर्मूलनं शूलपाणिम् । भजेऽहं भवानीपतिं भावगम्यम् ।।५।।

कलातीतकल्याणकल्पान्तकारी । सदा सज्जनानन्ददाता पुरारी ।।
चिदानन्दसन्दोहमोहापहारी । प्रसीद प्रसीद प्रभो मन्मथारी ।।६।।

न यावत् उमानाथपादारविन्दम् । भजन्तीह लोके परे वा नराणाम् ।।
न तावत्सुखं शान्तिसन्तापनाशम् । प्रसीद प्रभो सर्वभूताधिवासम् ।।७।।

न जानामि योगं जपं नैव पूजाम् । नतोऽहं सदा सर्वदा शम्भु तुभ्यम् ।।
जराजन्मदुःखौघतातप्यमानम् । प्रभो पाहि आपन्नमामीश शम्भो ।।८।।

रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष्टये ।
ये पठन्ति नरा भक्त्या तेषां शम्भुः प्रसीदति ।।९।।

***

* शिवमानसपूजा *

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदामितं चन्दनम् ।
जातीचम्पक–बिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ।।१।।

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ।।२।।

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वोणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिःस्तुतिर्बहुविधा ह्येतत्समस्तं मया
समल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ।।३।।

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वागिरो
यद्यत्कर्म करोमि तत्त दखिलं शम्भो तवाराधानम् ।।४।।

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्री महादेव शम्भो ।।५।।

***

* शिवताण्डवस्तोत्रम् *

जटाकटाहसंभ्रमं भ्रमन्निलिम्पनिर्झरी –
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ।।१।।

धराधरेन्द्रनन्दिनीविलासबंधुबन्धुर –
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीं निरुद्धदुर्धरापदि
क्वचिच्चिदम्बरे मनोविनोदमेतु वस्तुनि ।।२।।

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा
कदम्बकुंकुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे
मनोविनोदमद्भुतं बिभर्तुभूतभर्त्तरि ।।३।।

सहस्रलोचनप्रभृत्यशेषलेखशेखर –
प्रसूनधूलिधोरणी विधूसरांघ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियेचिराय जायतां चकोरबन्धुशेखरः ।।४।।

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखयाविराजमानशेखरं
महाकपालिसम्पदे शिरो जटालमस्तु नः ।।५।।

करालभालपट्टिकाधगद्धगद्धगज्ज्वल –
द्धनञ्जयाधरीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक –
प्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ।।६।।

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरद्
कुहूनिशीथिनीतमः प्रबन्धबन्धुकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसुन्दरः
कलानिधानबन्धुरः श्रियं जगद्धुरंधरः ।।७।।

प्रफुल्लनीलपमजप्रपञ्चकालिमच्छटा –
ऽविलम्बिकण्ठकन्धरारुचिप्रबन्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ।।८।।

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी –
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकांधकान्तकं तमंतकान्तकं भजे ।।९।।

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमस्फुर–
द्धगद्धगद्विनिर्गमत् करालभालहव्यवाट् ।
धिमिन्धिमिन्धिमिन्ध्वनन्मृदङ्गतुङ्गमङ्गल–
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ।।१०।।

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
गरिष्ठरत्नलोष्टयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषौ प्रजामहीमहेन्द्रयोः
समं प्रवृत्तयन् मनः कदा सदाशिवं भजे ।।११।।

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरस्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामभाललग्नकः
शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम् ।।१२।।

इमं हि नित्यमेव मुक्तमुत्तमोत्तमं स्तवं
पठन् स्मरन् ब्रुवन् नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां तु शंकरस्य चिन्तनम् ।।१३।।

पूजावसानसमये दशवक्त्रगीतं यः शम्भूपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्र तुरङ्गयुक्तां लक्ष्मी सदैव सुमुखीं प्रददाति
शम्भुः ।।

इति श्रीरावणविरचितशिवताण्डवस्तोत्रं सम्पूर्णम्

***

* श्रीदक्षिणामूर्तिस्तोत्रम् *

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयम्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणाभूर्तये ।।१।।

बीजस्यान्तरिवांकुरो जगदिदं प्राङ् निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलना वैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।२।।

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।३।।

नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादि-करणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।४।।

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।५।।

राहुग्रस्तदिवाकरेन्दुसदृशौ मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।६।।

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तःस्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो भद्रया मुद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।७।।

विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबंधतः ।
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।८।।

भूरंभास्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किंचन विद्यते विमृशतां यस्मात्परस्माद्विभोः,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।९।।

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तथै,
तेनास्य श्रवणात्तथार्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः,
सिद्धेत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ।।१०।।

***

।। अथ श्रीशिवमहिम्नः स्तोत्रम् ।।

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपमजम् ।।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृण-
न्ममाप्येष स्तोत्रे हर निरपवादः परिकरः ।।१।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतव्द्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ।।२।।

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन ! बुद्धिर्व्यवसिता ।।३।।

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन्वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ।।४।।

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ।।५।।

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर ! संशेरत इमे ।।६।।

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां ।
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ।।७।।

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ।।८।।

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिनपुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ।।९।।

तवैश्वर्यं यत्नाद्यदुपरि विरञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ।।१०।।

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ।।११।।

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि,
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ।।१२।।

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः ।
न तच्चित्रं तस्मिन्वरिवसितरित्वच्चरणयो-
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ।।१३।।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ।।१४।।

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभू -
त्स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ।।१५।।

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ।।१६।।

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ।।१७।।

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ।।१८।।

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ।।१९।।

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ।।२०।।

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामात्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ।।२१।।

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ।।२२।।

स्वलावण्याशंसा धृतधनुषमह्नाय तृणव -
त्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना -
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ।।२३।।

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा -
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं,
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ।।२४।।

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ।।२५।।

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह –
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिर,
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ।।२६।।

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा–
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ।।२७।।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां –
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि,
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ।।२८।।

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमितिशर्वाय च नमः ।।२९।।

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ।।३०।।

कृशपरिणति चेतः क्लेशवश्यं क्व चेद
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधा –
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ।।३१।।

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ।।३२।।

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तै स्तोत्रमेतच्चकार ।।३३।।

अहरहरनवद्यं धूर्जटेः स्तोत्रमेत–
त्पठति परमभक्त्या शुद्धचित्तः पुमान्यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च ।।३४।।

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नःस्तवपाठस्य कलां नार्हन्ति षोडषीम् ।।३५।।

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ।।३६।।

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ।।३७।।

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषा –
त्स्तवनमिदमकार्षीदिव्यदिव्यं महिम्नः ।।३८।।

सुरवरमुनिपुज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्प्रणीतम् ।।३९।।

श्रीपुष्पदन्तमुखपंकजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ।।४०।।

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ।।४१।।

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ! ।।४२।।

हरिः ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।

***

* महामृत्युञ्जयमन्त्र *

बीजमंत्र :- ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मूक्षीय माऽमृतात् ।।

महामृत्युञ्जय मन्त्राचे अनुष्ठान केल्याने आध्यात्मिक, आधिदैविक, आधिभौतिक तापांची निवृत्ति होते- अर्थात शारीरिक रोगांची निवृति, भूतपिशाचादि भय निवृत्ति होते व मानसिक प्रसन्नता लाभते. शरीर सम्बन्धी विशेष चिकित्सा (आपरेशनादि) करण्याच्यापूर्वी जर मन्त्र जप केला तर विशेष कष्ट होत नाहीत. आधिक लाभासाठी कमीत कमी सवालक्ष जप करायला पाहिजे. जप हा श्रीगुरुकडुन मन्त्र दीक्षा घेवुन व त्यांच्या मार्गदर्शनानुसार करावा. तसेच मन्त्रानुष्ठान हे शुचिर्भूत होवुन ब्राह्ममुहूर्तावर श्रीगुरुस्मरण पूर्वक शंकर भगवन्ताची मानसिक पूजा करून करावे. अनुष्ठानाचे महत्व महापुरुष सांगतात की -

''मृत्युञ्जयजपं नित्यं यः करोति दिने दिने ।
तस्य रोगाः प्रणश्यन्ति दीर्घायुश्च प्रजायते ।''

या मन्त्राचा जप जो साधक नित्य करतो त्याचे रोग सर्वनष्ट होतात आणि तो दीर्घायु होतो. जपाच्या नन्तर अशी प्रार्थना करावी -

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ।।१।।
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष रक्ष महेश्वर ।।२।।

अन्यमंत्र

त्र्यक्षर मन्त्रः - ॐ हौं जूं सः
शिवमन्त्रः - ॐहौं ॐ जूं सः ॐ नमः शिवाय
ॐ प्रपन्न पारिजाताय स्वाहा ।।

विद्यार्थ्यांना विद्याप्राप्ति साठी सरस्वती उपासना मन्त्र

सरस्वती मंत्र := ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः

***

* चर्पटपञ्जरिकास्तोत्रम् *

दिनमपि रजनी सायं प्रातः शिशिरवसंतौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ।।१।।
भज गोविंदं भज गोविंदं भज गोविंदं मूढमते
प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ्करणे । (ध्रुवपदम्)
अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षा तरुतलवासस्तदपि न मुंचत्याशापाशः ।।२।।
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोपि न गेहे ।।३।।
जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः ।।४।।
भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ।
सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम् ।।५।।
अंगं गलितं पलितं मुण्डं दशनविहिनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ।।६।।
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः
वृद्धस्तावच्चिन्तामग्नः परे ब्रह्मणि कोऽपि न लग्नः ।।७।।
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे भवदुस्तारे कृपयाऽपारे पाहि मुरारे ।।८।।

पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ।
पुनरप्ययनं पुनरपि वर्ष तदपि न मुञ्चत्याशामर्षम् ।।९।।
वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ।।१०।।
नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् ।।११।।
कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ।।१२।।
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् ।।१३।।
यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ।।१४।।
सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ।।१५।।
रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः ।।१५।।
कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमतेन मुक्तिर्न भवति जन्मशतेन ।।१६।।

***

* आत्मषट्कम् *

मनोबुद्ध्यहमारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमिर्न तेजो वायु –
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।१।।
न च प्राणसंज्ञो न पञ्चानिला मे
न वा सप्तधातुर्न वा पञ्चकोशः ।
न वाक्पाणिपादौ न चोपस्थपायू
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।२।।
न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्ष–
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।३।।
न पुण्यं न पापं न सौख्यं न दुःखं
न मन्त्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोग्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।४।।
न मे मृत्युशमा न मे जातिभेदः
पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य –
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।५।।
अहं निर्विकल्पो निराकाररूपो
विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणि ।
सदा मे समत्वं न मुक्तिर्न बन्धश्चिदा –
नन्दरूपः शिवोऽहं शिवोऽहम् ।।६।।

* * *

* परापूजा *

अखण्डे सच्चिदानन्दे निर्विकल्पैकरूपिणि ।
स्थितेऽद्वितीयभावेऽस्मिन् कथं पूजा विधीयते ।।१।।
पूर्णस्यावाहनं कुत्र सर्वधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ।।२।।
निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ।।३।।
निर्लेपस्य कुतो गन्धः पुष्पं निर्वासनस्य च ।
निर्विशेषस्य का भूषा कोऽलमारो निराकृतेः ।।४।।
निरञ्जनस्य किं धूपैर्दीपैर्वा सर्वसाक्षिणः ।
निजानन्दैकतृप्तस्य नैवेद्यं किं भवेदिह ।।५।।
विश्वानन्दयितुस्तस्य किं ताम्बुलं प्रकल्प्यते ।
स्वयंप्रकाशचिद्रूपो योऽसावर्कादिभासकः ।।६।।
प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नतिः ।
वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ।।७।।
स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः ।
अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ।।८।।
एवमेव परा पूजा सर्वावस्थासु सर्वदा ।
एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ।।९।।
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विविधोपभोगरचना निद्रा समाधिस्थितिः ।
संचारस्तु पदोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो ! तवाराधनम् ।।१०।।

***

* दशश्लोकी *

न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः । अनैकान्तिकत्वात् सुषुप्त्येकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।१।। न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणा ध्यानयोगादयोऽपि । अनात्माश्रयाहंममाध्यासहानात् तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।२।। न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति । सुषुप्तौ निरस्तातिशून्यात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।३।। न सांख्यं न शैवं न तत्पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा । विशिष्टानुभूत्या विशुद्धात्मकतत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।४।। न चोर्ध्वं न चाधो न चान्तर्न बाह्यं न मध्यं न तिर्यङ् न पूर्वा परा दिक् । वियद्व्यापकत्वादखण्डैकरूपस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।५।। न शुक्लं न कृष्णं न रक्तं न पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घम् । अरूपं तथा ज्योतिराकारकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।६।। न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपञ्चः । स्वरूपावबोधाद्विकल्पासहिष्णुस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।७।। न जाग्रन्न मे स्वप्नको वा सुषुप्तिर्न विश्वो न वा तैजसः प्राज्ञको वा । अविद्यात्मकत्वात् त्रयाणां तुरीयस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।८।। अपि व्यापकत्वाद्धितत्त्वप्रयोगात्स्वतः सिद्धभावादनन्याश्रयत्वात् । जगत्तुच्छमेतत्समस्तं तदन्यत्तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।९।। न चैकं तदन्यद् द्वितीयं कुतः स्यान्न वा केवलत्वम् न चाकेवलत्वम् । न शून्यं न चाशून्यमद्वैतकत्वात् कथं सर्ववेदान्तसिद्धिं ब्रवीमि ।।१०।।

***

* श्रीसरस्वत्यष्टकम् *

रविरुद्रपितामहविष्णुनुतं । हरिचन्दनकुंकुमपंकयुतं ।
मुनिवृन्दगणेंद्रसमानयुतं । तव नौमि सरस्वति पादयुगम् ।।१।।
शशिशुद्धसुधाहिमधामयुतं । शरदंबरबिंबसमानकरं ।
बहुरत्नमनोहरकान्तियुतं । तव नौमि सरस्वति पादयुगम् ।।२।।
कनकाब्जविभूषितभूतिभवं । भवभावविभाषितभिन्नपदं ।
प्रभुचित्तसमाहितसाधुपदं । तव नौमि सरस्वति पादयुगम् ।।३।।
भवसागरमज्जनभीतिनुतं । प्रतिपादितसंततिकारमिदं ।
विमलादिकशुद्ध विशुद्ध पदं । तव नौमि सरस्वति पादयुगम् ।।४।।
मतिहिनजनाश्रयपादमिदं । सकलागमभाषितभिन्नपदं
परिपूरितविश्वमनेकभवं । तव नौमि सरस्वति पादयुगम् ।।५।।
परिपूर्णमनोरथधामनिधिं । परमार्थविचारविवेकनिधिं ।
सुरयोषितसेवितपादतलं । तव नौमि सरस्वति पादयुगम् ।।६।।
सुरमौलिमणिद्युतिशुभ्रकरं । विषयादिमहाभयवर्णहरं ।
निजकांतिविलेपितचन्द्रशिवं । तव नौमि सरस्वति पादयुगम् ।।७।।
गुणनैककुलस्थितिभीतिपदं । गुणगौरवगर्वितसत्यपदं ।
कमलोदरकोमलपादतलं । तव नौमि सरस्वति पादयुगम् ।।८।।
त्रिसन्ध्यं यो जपेन्नित्यं जले वापि स्थले स्थितः ।
पाठमात्राद्भवेत्प्राज्ञो ब्रह्मनिष्ठः पुनः पुनः ।।९।।

।। इति श्रीसरस्वत्यष्टकम् ।।

***

* महिषासुरमर्दिनी स्तोत्रम् *

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते
गिरिवर-विन्ध्य-शिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्दिनी रम्यकपर्दिनि शैलसुते ।।१।।

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शमरतोषिनि । किल्बिषमोषिणि घोषरते ।
दनुजनिरोषिणि दितीसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।२।।

अयि जगदम्ब मदम्ब कदम्बवन - प्रियवासिनि हासरते
शिखरिशिरोमणि - तुङ्गहिमालय - शृङ्गनिजालय - मध्यगते ।
मधुमधुरे मधुकैटभगञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।३।।

अयि शतखण्ड - विखण्डित - रुण्ड - वितुण्डित - शुण्ड - गजाधिपते
रिपुगजगण्ड - विदारणचण्डपराक्रमशुण्ड - मृगाधिपते ।
निज - भुजदण्ड - निपातितखण्ड - निपतितमुण्ड - भटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।४।।

अयि रणदुर्मद - शत्रु - वधोदित - दुर्धरनिर्जर - शक्तिभृते
चतुरविचार - धुरीण - महाशव - दूतकृत - प्रमथाधिपते ।
दुरितदुरीह - दुराशय - दुर्मतिदानव - दुतकृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।५।।

अयि शरणागत – वैरिवधू – वरवीरवराभय – दायिकरे
त्रिभुवनमस्तकशूल – विरोधिशिरोधि – कृतायमल – शूलकरे ।
दुमिदुमितामरदुन्दुभिनाद – महो – मुखरीकृतदिग्मकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।६।।

अयि निजहुंकृतिमात्र – निराकृत – धुम्रविलोचन – धुम्रशते
समर – विशोषित – शोणितबिज – समुद्भवशोणितबीजलते ।
शिव – शिव शुम्भनिशुम्भमहाहव – तर्पितभुतपिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।७।।

धनुरनुसङ्गरणक्षण – सङ्ग – परिस्फुरदङ्ग – नटत्कटके
कनक – पिशङ्ग – पृषत्कनिषङ्ग – रसद्भटशृंङ्ग – हतावटुके ।
कृतचतुरङ्ग – बलक्षिति – रङ्ग – घटद्बहुरङ्ग – रटद् – बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।८।।

जयजय – जप्यजते जय – शब्द – परस्तुति – तत्पर – विश्वनुते
झणझणझिञ्झिमि – झिंकृतनुपुर – शिञ्जितमोहित – भुतपते ।
नटित – नटार्ध – नटीनटनायक – नाटितनाट्य – सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।९।।

अयि सुमनः सुमनः सुमनः सुमनः सुमनोहरकान्तियुते
श्रितरजनीरजनीरज – नीरजनीरजनीकर – वक्त्रभृते ।
सुनयनविभ्रमर भ्रमर भ्रमर – भ्रमर भ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१०।।

सहित – महाहव – मल्लमतल्लिकमल्लितरल्लकमल्लरते
विरचित – वल्लिकपल्लिक – मल्लिक – झिल्लिक – मिल्लिक –ब्लर्गवृते
सित – कृतफुल्ल – समुल्लसितारुण – तल्लज – पल्लव – सल्ललितै
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।११।।

अविरल – गण्डगलन् – मद – मेदुर – मत्त – मतङ्गजराज – पते
त्रिभुवन – भुषणभुत – कलानिधिरुपपयोनिधिराजसुते ।
अयि सुदतीजन – लालस – मानस – मोहन – मन्मथराज – सुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१२।।

कमलदलामल – कोमल – कान्ति – कलाकलितामल – भाललते
सकल – विलासकला – निलय – कृम – केलि – चलत्कलहंसकुले
अलिकुल – संमुल – कुवलयमण्डल – मौलिमिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१३।।

कर – मुरली – रव – वीजित – कूजित – लज्जित – कोकिल – मञ्जुमते
मिलित – पुलिन्द – मनोहर – गुञ्जित – रञ्जित – शैलनिकुञ्ज – गते ।
निजगुणभूत – महाशबरीगण – सद्गुण – सम्भृत – केलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१४।।

कटितट – पीत – दुकूल – विचित्र – मयुख – तिरस्कृत – चन्द्ररुचे
प्रणत – सुरासुर – मौलि – मणिस्फुरदंशु – लसन्नखचन्द्र – रुचे ।
जित – कनकाचलमौलि – पदोर्जित – निर्जर कुञ्जर – कुम्भ – कुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१५।।

विजित – सहस्रकरैकसहस्रकरैकसहस्त्रकरैकनुते
कृत – सुरतारक – सङ्गर – तारक सङ्गर – तारकसूनुसुते ।
सुरथसमाधि – समानसमाधि – समाधिसमाधि – सुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१६।।

पदकमल करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परम्पदमित्य नुशिलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१७।।

कनकल सत्कल – सिंधुजलैरनुषिञ्चिनु ते गुणरङ्गभुवं
भजति स किं न शचीकुचकुम्भ – तटीपरिरम्भ – सुखानुभवम ।
तवचरणं शरणं करवाणि नतामरवाणि निवासि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१८।।

तव – विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कुलयते
किमु पुरुहूतपुरीन्दुमुखी – सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिव नामधने भवतीकृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१९।।

अयि मयि दीनदयालुतया कृपयैवत्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथानुमितासि रते ।
यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरु मे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।२०।।

इति श्रीभगवती पुष्पांजली स्तोत्रम्

***

* श्री ज्ञानेश्वर महाराजकृत हरिपाठ *

१. सुंदर ते ध्यान उभे विटेवरी । कर कटावरी ठेवूनिया ।।१।।
तुळसी हार गळा कासे पीतांबर । आवडे निरंतर हेचि ध्यान ।।२।।
मकर कुंडले तळपती श्रवणी । कंठी कौस्तुभमणि विराजित ।।३।।
तुका म्हणे माझे हेचि सर्व सुख । पाहीन श्रीमुख आवडीने ।।४।।

२. देवाचिये द्वारी उभा क्षणभरी । तेणे मुक्ति चारी साधियेल्या ।।१।।
हरि मुखे म्हणा हरि मुखे म्हणा । पुण्याची गणना कोण करी ।।२।।
असोनि संसारी जिव्हें वेगु करी । वेदशास्त्र उभारी बाह्या सदा ।।३।।
ज्ञानदेव म्हणे व्यासाचिये खुणे । द्वारकेचा राणा पांडवा घरी ।।४।।

३. चहु वेदी जाण साहि शास्त्री कारण । अठराहि पुराणे हरिसी गाती ।।१।।
मन्थुनी नवनीता तैसे घे अनन्ता । वाया व्यर्थ कथा सांडी मार्ग ।।२।।
एक हरि आत्मा जीवशिव सम । वाया तु दुर्गमा न घाली मन ।।३।।
ज्ञानदेवा पाठ हरि हा वैकुंठ । भरला घनदाट हरि दिसे ।।४।।

४. त्रिगुण असार निर्गुन हें सार । सारासार विचार हरिपाठ ।।१।।
सगुण निर्गुण गुणाचे अगुण । हरीवीण मन व्यर्थ जाय ।।२।।
अव्यक्त निराकार नाहीं ज्या आकार । जेथोनी चराचर हरिसी भजे ।।३।।
ज्ञानदेवा ध्यानीं रामकृष्ण मनी । अनंत जन्मोनि पुण्य होय ।।४।।

५. भावेवीण भक्ति भक्तिवीण मुक्ति । बळेवीण भक्ति बोलूं नये ।।१।।
कैसेनि दैवत प्रसन्न त्वरित । उगा राहे निवांत शिणसी वायां ।।२।।
सायासे करिसी प्रपंच दिननिशीं । हरीसी न भजसी कवण्या गुणे ।।३।।
ज्ञानदेव म्हणे हरिजप करणे । तुटेल धरणें प्रपंचाचें ।।४।।

६. योगयागविधी येणे नव्हे सिद्धी । वायाचि उपाधी दंभ धर्म ।।१।।
भावेवीण देव न कळे निःसंदेह । गुरुवीन अनुभव कैसा कळे ।।२।।
तपेवीण दैवत दिधल्यावीण प्राप्त । गुजेवीण हित कोण सांगे ।।३।।
ज्ञानदेव सांगे दृष्टांताची मात । साधूचे संगती तरणोपाय ।।४।।

७. साधुबोध झाला नुरोनियां ठेला । ठायीच मुराला अनुभव ।।१।।
कापुराची वाती उजळली ज्योती । ठायीच समाप्ती झाली जैसी ।।२।।
मोक्षरेखे आला भाग्यें विनटला । साधूंचा अंकिला हरिभक्त ।।३।।
ज्ञानदेवा गोडी संगती सज्जनी । हरि दिसे जनी वनी आत्मतत्त्वी ।।४।।

८. पर्वताप्रमाणे पातक करणे । वज्रलेप होणें अभक्तांसी ।।१।।
नाहीं ज्यासी भक्ति तो पतित अभक्त । हरिसी न भजत दैवहत ।।२।।
अनंत वाचाळ बरळती बरळ । त्या कैसेनि गोपाळ पावे हरि ।।३।।
ज्ञानदेवा प्रमाण आत्मा हा निधान । सर्वाघटीं पूर्ण एक नांदे ।।४।।

९. संतांचे संगती मनोमार्ग गती । आकळावा श्रीपती येणें पंथें ।।१।।
रामकृष्ण वाचा भाव हा जीवाचा । आत्मा जो शिवाचा रामजप ।।२।।
एकतत्त्वनाम साधिति साधन । द्वैताचे बंधन न बांधिजे ।।३।।
नामामृतगोडी वैष्णवां लाधली । योगियां साधली जीवन कळा ।।४।।
सत्वर उच्चार प्रल्हादीं बिंबला । उद्धवा लाधला कृष्णदाता ।।५।।
ज्ञानदेव म्हणे नाम हें सुलभ । सर्वत्र दुर्लभ विरळा जाणे ।।६।।

१०. विष्णुवीण जप व्यर्थ त्याचें ज्ञान । रामकृष्णी मन नाहीं ज्याचें ।।१।।
उपजोनि करंटा नेणे अद्वैतवाटा । रामकृष्णीं पैठा कैसेनि होय ।।२।।
द्वैताची झाडणी गुरुवीण ज्ञान । तया कैचे कीर्तन घडेल नामी ।।३।।
ज्ञानदेव म्हणे सगुण हे ध्यान । नामपाठ मौन प्रपंचाचें ।।४।।

भजन – राम कृष्ण हरि जय जय राम कृष्ण हरि

११. त्रिवेणीसंगमी नाना तीर्थे भ्रमी । चित्त नाही नामी तरी ते व्यर्थ ।।१।।
नामासी विन्मुख तो नर पापिया । हरिवीण धावया न पवे कोणी ।।२।।
पुराणप्रसिद्ध बोलिले वाल्मिक । नामे तिन्ही लोक उद्धरती ।।३।।
ज्ञानदेव म्हणे नाम जपा हरीचे । परंपरा त्याचें कुळ शुद्ध ।।४।।

१२. हरि उच्चारणी अनंत पापराशी । जातील लयासी क्षणमात्रे ।।१।।
तृण अग्निमेळे समरस झालें । तैसें नामे केले जपतां हरि ।।२।।
हरिउच्चारण मंत्र हा अगाध । पळे भूतबाधा भेणें तेथें ।।३।।
ज्ञानदेव म्हणे हरि माझा समर्थ । न करवे अर्थ उपनिषदा ।।४।।

१३. तीर्थ व्रत नेम भावेवीण सिद्धि । वायांचि उपाधि करिसी जना ।।१।।
भावबळे आकळे येऱ्हवीं नाकळे । करतळी आवळे तैसा हरी ।।२।।
पारियाचा रवा घेतां भूमीवरी । यत्न परोपरी साधन तैसें ।।३।।
ज्ञानदेव म्हणे निवृत्ति निर्गुण । दिधलें संपूर्ण माझ्या हातीं ।।४।।

१४. समाधी हरीची समसुखेंवीण । न साधेल जाण द्वैतबुद्धि ।।१।।
बुद्धिचे वैभव अन्य नाहीं दुजें । एका केशीराजे सकळ सिद्धी ।।२।।
ऋद्धिसिद्धिनिधि अवघीच उपाधि । जंव त्या परमानंदीं मन नाहीं ।।३।।
ज्ञानदेवींरम्य रमलें समाधान । हरीचे चिंतन सर्व काळ ।।४।।

१५. नित्य सत्यामित हरिपाठ ज्यासी । कळिकाळ त्यासी न पाहे दृष्टी ।।१।।
रामकृष्ण उच्चार अनंतराशी तप । पापाचे कळप पळती पुढे ।।२।।
हरि हरि हरि मंत्र हा शिवाचा । म्हणती जे वाचा तयां मोक्ष ।।३।।
ज्ञानदेवा पाठ नारायण नाम । पाविजे उत्तम निजस्थान ।।४।।

१६. एकनाम हरि द्वैतनाम दुरी । अद्वैतकुसरी विरळा जाणे ।।१।।
समबुद्धि घेतां समान श्रीहरि । शमदमा वैरी हरी झाला ।।२।।
सर्वाघटीं राम देहादेहीं एक । सूर्य प्रकाशक सहस्ररश्मी ।।३।।
ज्ञानदेवा चित्ती हरिपाठ नेमा । मागिलिया जन्मा मुक्त झालों ।।४।।

१७. हरि बुद्धि जपे तो नर दुर्लभ । वाचेसी सुलभ रामकृष्ण ।।१।।
रामकृष्णनामीं उन्मनीं साधिली । तयासी लाधली सकळ सिद्धि ।।२।।
सिद्धि बुद्धि धर्म हरिपाठीं आले । प्रपंचीं निवाले साधुसंगें ।।३।।
ज्ञानदेवीं नाम रामकृष्ण ठसा । येणें दशदिशा आत्माराम ।।४।।

१८. हरिपाठ कीर्ति मुखें जरी गाय । पवित्रचि होय देह त्याचा ।।१।।
तपाचें सामर्थ्यें तपिन्नला अमूप । चिरंजीव कल्प वैकुंठ नादे ।।२।।
मातृ पितृ भ्राता सगोत्र अपार । चतुर्भुज नर होऊनि ठेले ।।३।।
ज्ञान गूढ गम्य ज्ञानदेवा लाधले । निवृत्तीने दिलें माझ्या हातीं ।।४।।

१९. हरिवंशपुराण हरिनामसंकीर्तन । हरिवीण सौजन्य नेणें कांहीं ।।१।।
तया नरा लाधलें वैकुंठ जोडलें । सकळही घडलें तीर्थाटन ।।२।।
मनोमार्गे गेला तो येथे मुकला । हरिपाठीं स्थिरावला तोचि धन्य ।।३।।
ज्ञानदेवा गोडी हरिनामची जोडी । रामकृष्णीं आवडी सर्वकाळ ।।४।।

भजन – जय विठोबा रखुमाई

२०. नामसंकीर्तन वैष्णवांची जोडी । पापें अनंत कोडी गेली त्यांचीं ।।१।।
अनंत जन्मांचें तप एक नाम । सर्व मार्ग सुगम हरिपाठ ।।२।।
योगयाग क्रिया धर्माधर्म माया । गेले ते विलया हरिपाठीं ।।३।।
ज्ञानदेवीं यज्ञ याग क्रिया धर्म । हरिवीण नेम नाहीं दुजा ।।४।।

२१. वेदशास्त्रप्रमाण श्रुतीचें वचन । एक नारायण सार जप ।।१।।
जप तप कर्म हरिवीण धर्म । वाउगाचि श्रम व्यर्थ जाय ।।२।।
हरिपाठीं गेले ते निवांतचि ठेले । भ्रमर गुंतले सुमनकळिके ।।३।।
ज्ञानदेवीं मंत्र हरिनामाचें शस्त्र । यमें कुळगोत्र वर्जियेले ।।४।।

२२. काळवेळ नाम उच्चारितां नाहीं । दोन्हीं पक्ष पाहीं उद्धरती ।।१।।
रामकृष्णनाम सर्व दोषा हरण । जडजीवा तारण हरि एक ।।२।।
हरिनाम सार जिह्वा या नामाची । उपमा त्या दैवाची कोण वानी ।।३।।
ज्ञानदेवा सांग झाला हरिपाठ । पूर्वजा वैकुंठमार्ग सोपा ।।४।।

२३. नित्यनेम नामीं तो प्राणी दुर्लभ । लक्ष्मीवल्लभ तयाजवळी ।।१।।
नारायणहरि नारायणहरि । भुक्ति मुक्ति चारी घरीं त्यांच्या ।।२।।
हरिवीण जन्म तो नरकचि पै जाणा । यमाचा पाहुणा प्राणी होय ।।३।।
ज्ञानदेव पुसे निवृत्तीसी चाड । गगनाहूनि वाड नाम आहे ।।४।।

२४. सात पांच तीन दशकांचा मेळा । एकतत्त्वी कळा दावी हरी ।।१।।
तैसें नव्हे नाम सर्व मार्गा वरिष्ठ । येथें कांहीं कष्ट न लागती ।।२।।
अजपाजपणें उलट प्राणाचा । तेथेही मनाचा निर्धारु असे ।।३।।
ज्ञानदेवा जिणें नामेवीण व्यर्थ । रामकृष्णी पंथ क्रमीयेला ।।४।।

२५. जप तप कर्म क्रिया नेम धर्म । सर्वाघटी राम भाव शुद्ध ।।१।।
न सोडी रे भावो टाकी रे संदेहो । रामकृष्णीं टाहो नित्य फोडी ।।२।।
जात वित्त गोत कुळ शीळ मात । भजे कां त्वरित भावनायुक्त ।।३।।
ज्ञानदेवा ध्यानीं रामकृष्ण मनीं । वैकुंठभुवनी घर केलें ।।४।।

२६. जाणीव नेणीव भगवंती नाहीं । हरि उच्चारणी पाही मोक्ष सदा ।।१।।
नारायणहरि उच्चार नामाचा । तेथें कळिकाळाचा रीघ नाहीं ।।२।।
तेथील प्रमाण नेणवें वेदांसी । तें जीवजंतूंसी केवीं कळे ।।३।।
ज्ञानदेवा फळ नारायण पाठ । सर्वत्र वैकुंठ केलें असे ।।४।।

२७. एकतत्त्व नाम दृढ धरीं मना । हरीसी करुणा येईल तुझी ।।१।।
तें नाम सोपें रे रामकृष्णगोविंद । वाचेशी सदगद जपे आधी ।।२।।
नामापरते तत्त्व नाहीरे अन्यथा । वाया आणिक पंथा जाशी झणी ।।३।।
ज्ञानदेवा मौन जपमाळ अंतरीं । धरोनी श्रीहरि जपे सदा ।।४।।

२८. सर्वसुखगोडी सर्वशास्त्र निवडी । रिकामा अर्धघडी राहू नको ।।१।।
लटिका व्यवहार सर्व हा संसार । वायां येरझार हरीवीण ।।२।।
नाम मंत्र जप कोटी जाईल पाप । रामकृष्णी संकल्प धरूनि राहे ।।३।।
निज वृत्ति काढी सर्व माया तोडी । इंद्रियां सवडी लपो नको ।।४।।
तीर्थव्रती भाव धरी रे करुणा । शांतिदयापाहुणा हरि करी ।।५।।
ज्ञानदेवा प्रमाण निवृत्तिदेवीं ज्ञान । समाधि संजीवन हरिपाठ ।।६।।

२९. नामसंकीर्तन साधन पैं सोपे । जळतील पापें जन्मांतरींचीं ।।१।।
नलगती सायास जावे वनांतरा । सुखे येतो घरा नारायण ।।२।।
ठायींच बैसोन करा एकचित । आवडी अनंत आळवावा ।।३।।
रामकृष्ण हरि विठ्ठल केशवा । मंत्र हा जपावा सर्वकाळ ।।४।।
यावीण असतां आणिक पै साधन । वाहातसे आण विठोबाची ।।५।।
तुका म्हणे सोपें आहे सर्वाहूनि । शाहाणा तो धणी घेतो येथें ।।६।।

३०. देवाचिये द्वारीं उभा क्षणभरीं । तेणें मुक्ति चारी साधियेल्या ।।१।।
हरि मुखे म्हणा हरि मुखे म्हणा । पुण्याची गणना कोण करी ।।२।।
असोनि संसारी जिव्हे वेगु करी । वेदशास्त्र उभारी बाह्या सदा ।।३।।
ज्ञानदेव म्हणे व्यासाचिये खुणे । द्वारकेचा राणा पांडवा घरी ।।४।।

भजन – जय विठोबा रखुमाई

***

* श्री गुरुपरंपरेचे अभंग *

१. सत्य गुरुरायें कृपा मज केली । परि नाही घडली सेवा कांही ।।१।।
सापडविले वाटे जाता गंगास्नाना । मस्तकीं तो जाणा ठेविला कर ।।२।।
भोजना मागती तूप पावशेर । पडिला विसर स्वप्नामाजी ।।३।।
काय कळे उपजला अंतराय । म्हणोनिया काय त्वरा झाली ।।४।।
राघवचैतन्य केशवचैतन्य । सांगितली खूण मालीकेची ।।५।।
बाबाजी आपुले सांगितले नाम । मंत्र दिला रामकृष्णहरि ।।६।।
माघ शुद्ध दशमी पाहुनि गुरुवार । केला अंगिकार तुका म्हणे ।।७।।

२. माझिये मनींचा जाणोनिया भाव । तो करी उपाव गुरुरावो ।।१।।
आवडीचा मंत्र सांगितला सोपा । जेणें नोहे गुंफा कांहीं कोठें ।।२।।
जाती पुढे एक उतरले पार । हा भव सागर साधुसंत ।।३।।
जाणत्या नेणत्या ज्या जैसी आवडी । उतार सांगडी तापे पेटे ।।४।।
तुका म्हणे मज दावियेला तारु । कृपेचा सागरु पांडुरंग ।।५।।

३. घालुनिया भार राहिलो निश्चिंती । निरविले संती विठोबासी ।।१।।
लावुनिया हात कुरवाळिला माथा । सांगितले चिंता न करावी ।।२।।
कटीं कर समचरण साजिरे । राहिला भीव्ररे तीरी उभा ।।३।।
खुंटले सायास आणिक या जीवा । धरिले केशवा पाय तुझे ।।४।।
तुज वाटे आता ते करी अनंता । तुका म्हणे संता लाज माझी ।।५।।

४. माझ्या विठोबाचा कैसा प्रेमभाव । आपणचि देव होय गुरु ।।१।।
पढिये देहाभावे पुरवी वासना । अंती ते आपणापाशी न्यावे ।।२।।
मागे पुढे उभा राहे सांभाळीत । आलिया आघात निवारावे ।।३।।
योगक्षेम त्याचे जाणे भडभारी । वाट दावी करीं धरूनियां ।।४।।
तुका म्हणे नाहीं विश्वास ज्या मनी । पहावे पुराणी विचारून ।।५।।

५. आदिनाथ उमा बीज प्रगटिले । मच्छिंद्रा लाधले सहज स्थिती ।।१।।
तेचि प्रेममुद्रा गोरक्षा दिधली । पूर्ण कृपा केली गहिनी नाथा ।।२।।
वैराग्ये तापला सप्रेम निवाला । ठेवा जो लाधला शांती सुख ।।३।।
निर्द्वंद्व निःशंक विचारता मही । सुखानन्द हृदयी स्थिरावला ।।४।।
विरक्तिचे पात्र अन्वयाचे मुख । येऊनि सम्यक् अनन्यता ।।५।।
निवृत्ति गहिनी कृपा केली पूर्ण । कुळ हे पावन कृष्णनामे ।।६।।

६. आदिनाथ गुरु सकळ सिद्धांचा । मच्छिंद्र तयाचा मुख्य शिष्य ।।१।।
मच्छिंद्राने बोध गोरक्षासी केला । गोरक्ष वोळला गहिनी प्रति ।।२।।
गहिनी प्रसादे निवृत्ति दातार । ज्ञानदेवा सार चोजविले ।।३।।

७. अवघेचि त्रैलोक्य आनंदाची आता । चरणी जगन्नाथा चित्त ठेले ।।१।।
माय जगन्नाथ बाप जगन्नाथ । अनाथाचा नाथ जनार्दन ।।२।।
एका जनार्दनी एकपने उभा । चैतन्याची शोभा शोभतसे ।।३।।

८. अवघाचि संसार सुखाचा करीन । आनंदे भरीन तिन्ही लोक ।।१।।
जाईन गे माये तया पंढरपुरा । भेटेन माहेरा आपुलिया ।।२।।
सर्व सुकृतांचे फळ मी लाहीन । क्षेम मी देईन पांडुरंगी ।।३।।
बाप रखुमा देविवरु विठलेशी भेटी । आपुले संवसाटी करुनि ठेवला ।।४।।

९. श्री गुरूसारिखा असता पाठिराखा । इतरांचा लेखा कोण करी ।।१।।
राजयाची कांता काय भीक मागे । मनाचिये जोगे सिद्धि पावे ।।२।।
कल्पतरु तळवटी जो कोणी बैसला । काय उणे त्याला सांगिजो जी ।।३।।
ज्ञानदेव म्हणे तरलो तरलो । आता उद्धरलो गुरुकृपे ।।४।।

भजन – जय जय महाराज ज्ञानेश्वर – माऊली ।
ज्ञानराज माऊली तुकाराम ।

* * *

* स्वामी दिव्यानन्द महाराजांची आरती *

आरति दिव्यानन्दा सद्गुरु सुखकंदा ।
काया वाचा मनोभावे ओवाळु गोविन्दा ।
आरति दिव्यानन्दा ।।धृ।।
दिव्यानन्दमूर्तिमान अवतार हरिहर ।
कलियुगी अवतरोनि केला भक्तांचा उद्धार ।।१।।
आरति दिव्यानन्दा ।।
वैराग्य भक्ति ज्ञान शांति क्षमा विरक्ती ।।
विवेक बुध्दि दक्ष दया निष्ठा सर्वाभूती ।।२।।
आरति दिव्यानन्दा ।।
सच्चिदानंदघन दिव्यानन्द केवळ ।
समस्त भक्त झाले तवं कृपेने निर्मळ ।।३।।
आरति दिव्यानन्दा । सद्गुरु सुखकंदा
काया वाचा मनोभावे ओवाळु गोविन्दा ।
आरति दिव्यानन्दा ।।धृ।।

***

* पसायदान *

आता विश्वात्मके देवे । येणे वाग्यज्ञे तोषावे ।
तोषोनि मज द्यावे । पसायदान हे ।।१।।
जे खळांची व्यंकटी सांडो । तया सत्कर्मी रती वाढो ।
भूतां परस्परे पडो । मैत्र जीवांचे ।।२।।
दुरितांचे तिमिर जावो । विश्व स्वधर्मसूर्ये पाहो ।
जो जे वांछील तो ते लाहो । प्राणिजात ।।३।।
वर्षत सकलमंगळी । ईश्वर निष्ठांचीं मांदियाळी ।
अनवरत भूमंडळी । भेटतु या भूता ।।४।।
चला कल्पतरूचे अरव । चेतना चिंतामणींचे गाव ।
बोलते जे अर्णव । पीयूषांचे ।।५।।
चंद्रमे जे अलांछन । मार्तंड जे तापहीन ।
जे सर्वांही सदा सज्जन । सोयरे होतु ।।६।।
किंबहुना सर्व सुखी । पुर्ण होऊनि तिर्ही लोकी ।
भजि जो आदि पुरुखी अखंडित ।।७।।
आणि ग्रंथोपजीविये । विशेषी लोकीं इये ।
दृष्टादृष्ट विजये । होआवेजी ।।८।।
तेथ म्हणे श्री विश्वेश्वरावो । हा होईल दानपसावो ।
येणे वरे ज्ञानदेवो । सुखिया जाला ।।९।।

***

श्रोत्रिय ब्रह्मनिष्ठ १०८

स्वामी श्री रसानंदपुरीजी महाराज



जयाचेनि अपांगपाते । बंध मोक्षपणी आते ।।
भेटे जाणतया जाणते । जयापाशी ।।

प्रकाशक

श्री १०८ स्वामी रसानन्द पुरीजी महाराज
दिव्यानन्द आश्रम, दिव्यनगर, मानवत.
ता. मानवत, जि. परभणी
फोन : (०२१५१) २४०१६१
मोबा. ९४२३४४३७९७

प्रथम संस्करण : १०००

प्रकाशन तिथी :

अधिक भाद्रपद
शु. एकादशी
शके १९३४
२७ ऑगस्ट २०१२ (सोमवार)

प्राप्तिस्थान :

१) दिव्यानन्द आश्रम, दिव्यनगर, मानवत.
ता. मानवत, जि. परभणी
फोन : (०२१५१)२४०१६१
मोबा. ९४२३४४३७९७

२) श्री सद्‌गुरु मंदिर, सावरकरनगर, मानवत.

३) श्री पंडित गुरु आश्रम, कोल्हा.